# प्रो. जेकोबीना पत्रनो उत्तर

मुनि नेमिविजय-मुनिआनन्दसागर

॥ अर्हं ॥

राजनगरतो मुनिनेमविजयानन्दसागराभ्यां ज्ञानाभ्यासविलासवासितान्तः-करणान् संस्कृताध्यापकान् याकोबिप्रख्यान् प्रति दत्तो धर्मलाभो विलसतुतराम्।

भवतां समागतं परीहार्यमीमांसाप्रत्युत्तरं श्राद्धखीमजीहीरजीकायानी-समाख्यातं प्रति चिरकालेन समालभ्य तत्प्रत्युत्तरविसर्जनं विधीयते । तथा हि - भूयिष्ठजैनागमसम्मतमद्य-मांसभक्षणनिषेधव्यवस्थायां यदैकमत्यं प्रादर्शि तन्मर्मज्ञोचितम् । "किन्तु" यत् प्राचीनानां मद्य-मांस-भक्षणस्य निषेधो न सर्वदाऽऽसीदिति प्रतिपादनार्थमुग्रसेनं दृष्टान्तत्वेनोपन्यस्य तदादीनामार्हतत्वं तीर्थकरसम्बन्धादनुमितं, तन्न - तीर्थकरसम्बन्धिनो जैना एवेत्यत्र विनिगमनाविरहात्, शान्तिनाथादितीर्थसृट्सम्बन्धिषु जैनभिन्नत्वोपलब्धेः । अधुनातनजैनानामपि स्वभिन्नसम्बन्धदर्शनाच्च । केनचिदाचरितस्य समुदायाचरणानुमानेऽकारणत्वाच्च । उग्रसेनकुमारीपरिणयावसरबद्धपशुसमजारटिश्रवणचकितपृष्टसारथिनिवेदित-तत्कारणकतदनुभाविमृगवधप्रतिषेधकृज्ज्ञानत्रयविभूषितभगवन्नेमिचरित्रचमत्कृति-स्वादननैपुण्येनाऽऽर्हतानां मांसभक्षणपरीहारानुमानस्यैव दार्ढ्याच्च ।

यच्च, समाचारान्यथात्वप्रपञ्चनपाटवेन प्राचीनस्थविरकल्पिकमुनिकर्तृक-मांसभक्षणानुमानेऽपि न क्षतिरित्युच्यते - तदपि रभसात् । प्राचीनाद्यतनस्थविर-कल्पिकमुनिकर्तृकभक्षणाचारस्यैकत्वात् । अद्यतनानां मुनीनां मद्यमांसभक्षणाचारस्य सर्वथाभावात् । जिनकल्पिकानां तु तद्भक्षणं न सम्भवत्येवेति पूर्वमेव विशदी-कृतम् ।

यदपि च, तिक्तेत्यादिकोशबलेनोपलब्धावपि वनस्पतिनिष्ठवाच्यतायाः स्त्रीत्वेनोद्दिष्टो मत्स्यशब्दोऽत्र सूत्रे तु पुंस्त्वेनेति मत्स्यशब्दस्य न मीनार्थातिरिक्त-वाचकत्वमित्याद्युक्तं, तदप्यसत् - चण्ड-सिद्धहेमचन्द्र-पाणिनीयव्याकरणस्थ-"**क्वचिद् व्यत्ययः**" - "**लिङ्गमतन्त्रं**"- "**लिङ्गं व्यभिचार्यपी**"तिसूत्रैर्लिङ्ग-व्यत्ययस्याऽपि सद्भावात् । अत एव तत्र तत्र लिङ्गव्यत्ययेनोक्तिरपि सङ्गच्छते।

यच्चोक्तं - यदि मत्स्यशब्दस्य मुख्यार्थव्यतिरेकेणाऽर्थान्तराभिधायित्वं स्यात् तदा तस्याऽर्थान्तरस्य बाधकमेव मांसशब्दस्य तेन सह सामानाधिकरण्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादित्यादि-तदपि न; मांसशब्दस्य स्वयंस्वीकृतफलगर्भविशेषार्थस्याऽस्मरणात् । एतेनाऽर्थः **प्रकरणमित्यादिसिध्यत्यन्त**मपास्तमवसेयम् । एवं शक्यार्थेनैव निर्वाहे लक्षणाविषयकचर्चाया अनुदय एव ।

यच्चोक्तं – दशमोद्देशके भोजनपानयोः प्रस्तुतत्वाच्चिकित्साया अभावाच्च न भुजिर्बाह्यपरिभोगार्थो गृह्यते – तदप्यापाततः, अत्रैव पिण्डैषणाप्रकरणेऽप्रस्तुतस्याऽपि विहारस्य कथञ्चित् प्रसक्तेरविरुद्धत्ववन्मांसकर्मकबाह्यपरिभोगार्थस्याऽप्यविरुद्धत्वादिति विभावनीयम् ।

यच्च – पद्मावतीं काममञ्जरीं वा वृणुष्वेत्यत्रेव सकृदुच्चरितो भुजिर्नाऽभ्यवहारं बाह्यपरिभोगं चाऽर्थं वक्तुं शक्त इत्यादि – तदप्यनुचितम्; एकस्यैव बाह्यपरिभोगार्थस्य टीकाकृता कथनात् ।

यश्च मर्मजिज्ञासोर्भवतो मांसभक्षण-लेपनदोषतारतम्यप्रश्नस्तत्रेदं विचार्यते- मांसभक्षणं बहुश्रुतविरोधेनाऽऽसक्तिविशेषजनकत्वेन विपाकदारुणत्वेन हिंसामूलकत्वेन च सुतरां परिहार्यम् । अन्यत्तु न सर्वथा तथाविधमिति लूतादिविषमरोगसद्भावापरिहारे सदोषमपि सद्वैद्योपदेशतो न विरुध्यत इत्यादि स्वयमेव '**आयं वयं तुलिज्जा**' इत्यादिसिद्धान्तवचनबलेनोहनीयमिति ।

दृष्टान्तत्वेन जिनकल्पोपादानं भवद्भिः कृतमप्याङ्ग्लभाषावैदग्ध्यदोषतः कायानीकृतभाषान्तरानुसरणतो न तथाऽवगतमिति नाऽस्मद्दोष इत्यतः प्रहितमुद्रितपत्रतोऽवगन्तव्यम् ।

एतावता मूल एव पुनरावृत्तेः प्रागपि च सत्यार्थप्रकाशनेनाऽनाग्रहित्वप्रसिद्धिर्भवतां भवेदित्याशास्वहे ।

एनं विचारमवधार्योचितकरणीयाय भवते ब्रूवो यदि काचिच्छङ्का भवत उदेष्यति तर्ह्यावां भवत्प्रहितं पत्रं तूर्णमवाप्य तद्विनोदाय यतेवहीति ।

पत्रं तु नीचैस्तने स्थाने प्रैष्यम्-

तत्र शिरोनाम — 'नेमिविजयानन्दसागरौ'

स्थानं — पांजरापोल<br>
जैनतत्त्वविवेचकसभा-<br>
मन्त्री-केशवलाल अमथाभाई<br>
अहमदाबाद ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org